# केन्द्रीयसंस्कृतविश्वविद्यालयः

## क.जे.सोमैयापरिसरः

विद्याविहारः, मुम्बई ७७

---

## भारतीयभाषामहोत्सवः

**(दिनाङ्कः 08.12.2023 तः 11.12.2023 पर्यन्तम्, समयः 04.00)**

## प्रतिवेदनम्

| | |
|---|---|
| मुख्यातिथिः | – प्रो.सुनीलरामटेके |
| अध्यक्षः | – प्रो.के.के.शैनः |
| संयोजकः | – प्रो.बोधकुमारझाः |
| सञ्चालकः | – डॉ. संदीप वसन्त जोशी |

केन्द्रीयसंस्कृतविश्वविद्यालयस्य क.जे.सोमैयापरिसरे भारतीयभाषोत्सवस्य आयोजनं कृतम् । अस्मिन् कार्यक्रमे 08.12.2023 दिनाङ्के **मातृभाषायां मातृभूमिवर्णनम्** इति विषयमधिकृत्य भाषणप्रतियोगिता आयोजिता आसीत् । मुम्बादेवी-आदर्शसंस्कृतमहाविद्यालयस्य परिसरस्य च छात्राः अत्र भागं गृहीतवन्तः । अस्यां प्रतियोगितायां मराठीभाषायाः उडियाभाषायाः च आहत्य २० छात्राः भागमगृह्णन् । प्रतिभाषं प्रथमद्वितीयतृतीयपुरस्काररूपेण छात्राः धनराशिना प्रमाणपत्रेण च सम्मानिताः । मराठीभाषायाः प्रतियोगितायाम् अभिषेकथिटे, श्रीपादवैद्यः, साईलीमालजी एते छात्राः क्रमशः प्रथमद्वितीयतृतीयपुरस्कारं प्राप्तवन्तः । उडियाभाषायाः प्रतियोगितायां स्मिताराणीमहापात्रः, मीनामणिजेना, अजितदीक्षितः इति एते छात्राः क्रमशः प्रथमद्वितीयतृतीयपुरस्कारं प्राप्तवन्तः ।

पुरस्कारप्रदानकार्यक्रमस्य स्वागतभाषणं प्रो.बोधकुमारझामहोदयेन कृतम् । अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण प्रो.सुनीलरामटेकेमहोदयः उपस्थितः आसीत् । सः भाषायाः महत्त्वं प्रतिपाद्य मराठीभाषयाः स्वरूपम् उपस्थापितवान् । कार्यक्रमस्य अध्यक्षतां परिसरस्य निदेशकवर्यः प्रो.के.के.शैनवर्यः निरूढावान् । आध्यक्षीयभाषणे प्रो.के.के.शैनवर्यः मातृभाषायाः महत्त्वं प्रतिपाद्य मातृभाषाध्ययनस्य लाभान् प्रतिपादितवान् । धन्यवादज्ञापनम् डॉ.आनन्दपण्ड्यामहोदयेन विहितम् । मञ्चसञ्चालनम् डॉ.संदीपजोशीमहोदयेन कृतम् कार्यक्रमस्य संयोजकः प्रो.बोधकुमारझामहोदयः आसीत् । कार्यक्रमेऽस्मिन् परिसरस्य मु.आ.सं.महाविद्यालयस्य च प्राध्यापकाः छात्राः च  सोत्साहं भागं गृहीतवन्तः । शान्तिमन्त्रेण कार्यक्रमस्य समापनं जातम् ।

11.12.2023 दिनाङ्के मातृभाषागानप्रतियोगिता आयोजिता आसीत्। अस्यां प्रतियोगितायां सप्तसु भाषासु छात्राः गानं प्रस्तुतवन्तः। तत्र आदर्शकुमारमहापात्रः (प्रथमः), कोमलराउतः (द्विताया), केयूरकुलकर्णी (तृतीयः), श्रीपादवैद्यः (सन्त्वना), प्राजक्तापेण्डसे (सान्त्वना) इति एते छात्राः धनराशिना प्रमाणपत्रेण च सम्मानिताः। सायङ्काले कविगोष्ठी आयोजिता आसीत्। यत्र परिसरस्य छात्राः सोत्साहं स्वरचितकाव्यं प्रस्तुतवन्तः। परिसरस्य प्राध्यापकाः अपि स्वरचितकाव्यप्रस्तुतिं कृतवन्तः। परिसरस्य निदेशकवर्यः स्वरचितं संस्कृतकाव्यं प्रास्तौत्। कार्यक्रमान्ते पुरणपोळी इत्याख्यस्य महाराष्ट्रराज्यस्य प्रसिद्धस्य पक्वान्नस्य सर्वे आस्वादनं कृतवन्तः।

## कार्यक्रमस्य चित्राणि



अतिथिस्वागतम्



दीपप्रज्वलनम्




स्वागतभाषणम्

श्रोतृवृन्दः





भाषणप्रतियोगिता







**सहसंयोजकः**

**डॉसंदीपवसन्तजोशी**
संस्कृतसाहित्यविद्याशाखा,
क.जे.सोमैयापरिसरः, मुम्बई

**संयोजकः**

**प्रो.बोधकुमारझाः**
व्याकरणविभागाध्यक्षः,
क.जे.सोमैयापरिसरः, मुम्बई